# shrIvaikuNThagadyam

# શ્રીવૈકુણ્ઠગદ્યમ્

## Document Information

Text title : vaikuNThagadyam

File name : vaikuNThagadyam.itx

Category : gadyam, vishhnu, krishna, rAmAnuja, vishnu

Location : doc_vishhnu

Author : rAmAnuja

Transliterated by : Rajnarayanan C K krajnara at gmail.com

Proofread by : Rajnarayanan C K, PSA Easwaran

Description-comments : One of the three gadyam-s (gadyatrayam)

Latest update : January 11, 2017

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 25, 2022

*sanskritdocuments.org*

# શ્રીવૈકુણ્ઠગદ્યમ્

યામુનાર્યસુધામ્ભોધિમવગાહ્ય યથામતિ ।
આદાય ભક્તિયોગાખ્યં રત્નં સન્દર્શયામ્યહમ્ ॥

સ્વાધીનત્રિવિધચેતનાચેતનસ્વરૂપસ્થિતિપ્રવૃત્તિભેદં,
ક્લેશકર્માદ્યશેષદોષાસંસ્પૃષ્ટં,સ્વાભાવિકાનવધિકાતિશય-
જ્ઞાનબલૈશ્વર્યવીર્યશક્તિતેજઃપ્રભૃત્યસઙ્ખ્યેયકલ્યાણગુણગણૌઘમહાર્ણવં,
પરમપુરુષં, ભગવન્તં, નારાયણં, સ્વામિત્વેન સુહૃત્ત્વેન ગુરુત્વેન ચ
પરિગૃહ્ય ઐકાન્તિકાત્યન્તિકતત્પાદામ્બુજદ્વયપરિચર્યૈકમનોરથઃ,
તત્પ્રાપ્તયે ચ તત્પાદામ્બુજદ્વયપ્રપત્તેરન્યન્ન મે કલ્પકોટિસહસ્રેણાપિ
સાધનમસ્તીતિ મન્વાનઃ, તસ્યૈવ ભગવતો નારાયણસ્યાખિલસત્ત્વ-
દયૈકસાગરસ્યાનાલોચિતગુણગણાખણ્ડજનાનુકૂલમર્યાદાશીલવતઃ
સ્વાભાવિકાનવધિકાતિશયગુણવત્તયા દેવતિર્યઙ્મનુષ્યાદ્યખિલજન-
હૃદયાનન્દનસ્ય આશ્રિતવાત્સલ્યૈકજલધેઃ ભક્તજનસંશ્લેષૈકભોગસ્ય
નિત્યજ્ઞાનક્રિયૈશ્વર્યભોગસામગ્રીસમૃદ્ધસ્ય મહાવિભૂતેઃ
શ્રીમચ્ચરણારવિન્દયુગલમનન્યાત્મસઞ્જીવનેન તદ્ગતસર્વભાવેન
શરણમનુવ્રજેત્ ॥

તતશ્ચ પ્રત્યહમાત્મોજ્જીવનાયૈવમનુસ્મરેત્ ।
ચતુર્દશભુવનાત્મકમણ્ડં દશગુણિતોત્તરં ચાવરણસપ્તકં
સમસ્તં કાર્યકારણજાતમતીત્ય પરમવ્યોમશબ્દાભિધેયે
બ્રહ્માદીનાં વાઙ્મનસાઽગોચરે શ્રીમતિ વૈકુણ્ઠે દિવ્યલોકે
સનકવિધિશિવાદિભિરપિ અચિન્ત્યસ્વભાવૈશ્વર્યૈઃ
નિત્યસિદ્ધૈરનન્તૈઃ ભગવદાનુકૂલ્યૈકભોગૈઃ દિવ્યપુરુષૈઃ
મહાત્મભિરાપૂરિતે, તેષામપિ ઇયત્પરિમાણમિયદૈશ્વર્યં
ઈદૃશસ્વભાવમિતિ પરિચ્છેત્તુમયોગ્યે દિવ્યાવરણશતસહસ્રાવૃતે
દિવ્યકલ્પકતરૂપશોભિતે દિવ્યોદ્યાનશતસહસ્રકોટિભિરાવૃતે
અતિપ્રમાણે દિવ્યાયતને કસ્મિંશ્ચિદ્વિચિત્રદિવ્યરત્નમયદિવ્યાસ્થાનમણ્ડપે

દિવ્યરત્નસ્તમ્ભશતસહસ્રકોટિભિરુપશોભિતે
દિવ્યનાનારત્નકૃતસ્થલવિચિત્રિતે દિવ્યાલઙ્કારાલઙ્કૃતે
પરિતઃ પતિતૈઃ પતમાનૈઃ પાદપસ્થૈશ્ચ નાનાગન્ધવર્ણૈઃ
દિવ્યપુષ્પૈઃ શોભમાનદિવ્યપુષ્પોપવનૈરુપશોભિતે,
સઙ્કીર્ણપારિજાતાદિકલ્પદ્રુમોપશોભિતૈરસઙ્કીર્ણૈશ્ચ
કૈશ્ચિદન્તસ્થપુષ્પરત્નાદિનિર્મિતદિવ્યલીલામણ્ટપશતસહસ્રોપ-
શોભિતૈસ્સર્વદાનુભૂયમાનૈરપ્યપૂર્વવદાશ્ચર્યમાવહદ્ભિઃ
ક્રીડાશૈલશતસહસ્રૈરલઙ્કૃતૈઃ કૈશ્ચિન્નારાયણદિવ્યલીલાઽસાધારણૈઃ
કૈશ્ચિત્પદ્મવનાલયા દિવ્યલીલાસાધારણૈઃ
કૈશ્ચિચ્છુકશારિકામયૂરકોકિલાદિભિઃ કોમલકૂજિતૈરાકુલૈઃ
દિવ્યોદ્યાનશતસહસ્રકોટિભિરાવૃતે, મણિમુક્તાપ્રવાલકૃતસોપાનૈઃ
દિવ્યામલામૃતરસોદકૈઃ દિવ્યાણ્ડજવરૈરતિરમણીયદર્શનૈઃ
અતિમનોહરમધુરસ્વરૈરાકુલૈઃ અન્તસ્સ્થમુક્તામયદિવ્યક્રીડાસ્થાનોપશોભિતૈઃ
દિવ્યસૌગન્ધિકવાપીશતસહસ્રૈઃ દિવ્યરાજહંસાવલીવિરાજિતૈરાવૃતે,
નિરસ્તાતિશયનાનન્દૈકરસતયા ચાનન્ત્યાચ્ચ પ્રવિષ્ટાનુન્માદયદ્ભિઃ
ક્રીડોદ્દેશૈર્વિરાજિતે, તત્ર તત્ર કૃતદિવ્યપુષ્પપર્યઙ્કોપશોભિતે,
નાનાપુષ્પાસવાસ્વાદમત્તભૃઙ્ગાવલીભિરુદ્ગીયમાનદિવ્યગાન્ધર્વેણાપૂરિતે
ચન્દનાગરુકર્પૂરદિવ્યપુષ્પાવગાહિ મન્દાનિલાસેવ્યમાને, મધ્યે
પુષ્પસઞ્ચયવિચિત્રિતે, મહતિ દિવ્યયોગપર્યઙ્કે અનન્તભોગિનિ,
શ્રીમદ્વૈકુણ્ઠૈશ્વર્યાદિ દિવ્યલોકમાત્મકાન્ત્યા વિશ્વમાપ્યાયયન્ત્યા
શેષશેષાશનાદિ સર્વં પરિજનં ભગવતસ્તત્તદવસ્થોચિતપરિચર્યાયામાજ્ઞાપયન્ત્યા,
શીલરૂપગુણવિલાસાદિભિરાત્માનુરૂપયા શ્રિયા સહાસીનં,
પ્રત્યગ્રોન્મીલિતસરસિજસદૃશનયનયુગલં, સ્વચ્છનીલજીમૂતસઙ્કાશં
અત્યુજ્વલપીતવાસસં સ્વયા પ્રભયાઽતિનિર્મલયાઽતિશીતલયાઽતિકોમલયા
સ્વચ્છમાણિક્યાભયા કૃત્સ્નં જગદ્ભાવયન્તં
અચિન્ત્યદિવ્યાદ્ભુતનિત્યયૌવનસ્વભાવલાવણ્યમયામૃતસાગરં,
અતિસૌકુમાર્યાદીષત્પ્રસ્વિન્નવદાલક્ષ્યમાણલલાટફલક-
દિવ્યાલકાવલીવિરાજિતં, પ્રબુદ્ધમુગ્ધામ્બુજચારુલોચનં,
સવિભ્રમભ્રૂલતમુજ્વલાધરં, શુચિસ્મિતં, કોમલગણ્ડમુન્નસં,
ઉદગ્રપીનાંસવિલમ્બિકુણ્ડલાલકાવલીબન્ધુરકમ્બુકન્ધરં,
પ્રિયાવતંસોત્પલકર્ણભૂષણશ્લથાલકાબન્ધવિમર્દશંસિભિઃ
ચતુર્ભિરાજાનુવિલમ્બિભિર્ભુજૈર્વિરાજિતં, અતિકોમલ

દિવ્યરેખાલઙ્કૃતાતામ્રકરતલં, દિવ્યાઙ્ગુલીયકવિરાજિતં
અતિકોમલદિવ્યનખાવલીવિરાજિતમતિરક્તાઙ્ગુલીભિરલઙ્કૃતં,
તત્ક્ષણોન્મીલિતપુણ્ડરીકસદૃશચરણયુગલમતિમનોહરકિરીટમકુટચૂડાવતંસ-
મકરકુણ્ડલગ્રૈવેયકહારકેયૂરકટકશ્રીવત્સકૌસ્તુભમુક્તાદામોદરબન્ધન-
પીતામ્બરકાઞ્ચીગુણનૂપુરાદિભિરત્યન્તસુખસ્પર્શૈર્દિવ્ય-
ગન્ધૈર્ભૂષણૈર્ભૂષિતં, શ્રીમત્યા વૈજયન્ત્યા
વનમાલયા વિરાજતં, શઙ્ખચક્રગદાસિશાર્ઙ્ગાદિદિવ્યાયુધૈઃ સેવ્યમાનં,
સ્વસઙ્કલ્પમાત્રાવક્લૃપ્તજગજ્જન્મસ્થિતિધ્વંસાદિકે શ્રીમતિ વિષ્વક્સેને
ન્યસ્તસમસ્તાત્મૈશ્વર્યં, વૈનતેયાદિભિઃ સ્વભાવતો
નિરસ્તસમસ્તસાંસારિકસ્વભાવૈઃ ભગવત્પરિચર્યાકરણ-
યોગ્યૈર્ભગવત્પરિચર્યૈકભોગૈઃ નિત્યસિદ્ધૈરનન્તૈર્યથાયોગં
સેવ્યમાનમાત્મભોગેનાનુસંહિતપરાદિકાલં,
દિવ્યામલકોમલાવલોકનેન વિશ્વમાહ્લાદયન્તમીષદુન્મીલિત-
મુખામ્બુજોદરવિનિર્ગતેન દિવ્યાનનારવિન્દશોભાજનનેન
દિવ્યગામ્ભીર્યૌદાર્યસૌન્દર્યમાધુર્યાદ્યનવધિકગુણગણવિભૂષિતેન
અતિમનોહરદિવ્યભાવગર્ભેણ દિવ્યલીલાલાપામૃતેન
અખિલજનહૃદયાન્તરાણ્યાપૂરયન્તં ભગવન્તં નારાયણં
ધ્યાનયોગેન દૃષ્ટ્વા તતો ભગવતો નિત્યસ્વામ્યમાત્મનો
નિત્યદાસ્યં ચ યથાવસ્થિતમનુસન્ધાય કદાહં ભગવન્તં
નારાયણં મમ કુલનાથં મમ કુલદૈવતં મમ કુલધનં મમ ભોગ્યં
મમ માતરં મમ પિતરં મમ સર્વં સાક્ષાત્કરવાણિ ચક્ષૂષા ।
કદાહં ભગવત્પાદામ્બુજદ્વયં શિરસા સઙ્ગ્રહીષ્યામિ ।
કદાહં ભગવત્પાદામ્બુજદ્વયં પરિચર્યાઽઽશયા નિરસ્તસમસ્તેતર-
ભોગાશોઽપગતસમસ્તસાંસારિકસ્વભાવઃ તત્પાદામ્બુજદ્વયં
પ્રવેક્ષ્યામિ । કદાહં ભગવત્પાદામ્બુજદ્વયં પરિચર્યાકરણયોગ્યઃ
તત્પાદૌ પરિચરિષ્યામિ । કદા માં ભગવાન્ સ્વકીયયાઽતિશીતલયા
દૃશાઽવલોક્ય સ્નિગ્ધગમ્ભીરમધુરયા ગિરા પરિચર્યાયાં
આજ્ઞાપયિષ્યતીતિ ભગવત્પરિચર્યાયામાશાં વર્ધયિત્વા
તયૈવાશયા તત્પ્રસાદોપબૃંહિતયા ભગવન્તમુપેત્ય દૂરાદેવ
ભગવન્તં શેષભોગે શ્રિયા સહાસીનં વૈનતેયાદિભિઃ
સેવ્યમાનં “સમસ્તપરિવારાય શ્રીમતે નારાયણાય નમ”
ઇતિ પ્રણમ્યોત્થાયોત્થાય પુનઃ પુનઃ પ્રણમ્ય અત્યન્ત

સાધ્વસવિનયાવનતો ભૂત્વા ભગવત્પારિષદગણનાયકૈર્દ્વારપાલૈઃ
કૃપયા સ્નેહગર્ભયા દૃશાઽવલોકિતઃ સમ્યગભિવન્દિતૈઃ
તૈસ્તૈરેવાનુમતો ભગવન્તમુપેત્ય શ્રીમતા મૂલમન્ત્રેણ માં
ઐકાન્તિકાત્યન્તિકપરિચર્યાકરણાય પરિગૃહ્ણીષ્વેતિ યાચમાનઃ
પ્રણમ્યાત્માનં ભગવતે નિવેદયેત્ ।

તતો ભગવતા સ્વયમેવાત્મસઞ્જીવનેન મર્યાદાશીલવતા
અતિપ્રેમાન્વિતેનાવલોકનેનાવલોક્ય સર્વદેશસર્વકાલ-
સર્વાવસ્થોચિતાત્યન્તશેષભાવાય સ્વીકૃતોઽનુજ્ઞાતશ્ચ
અત્યન્તસાધ્વસવિનયાવનતઃ કિઙ્કુર્વાણઃ કૃતાઞ્જલિપુટો
ભગવન્તમુપાસીત ।

તતશ્ચાનુભૂયમાનભાવવિશેષઃ નિરતિશયપ્રીત્યાઽન્યત્કિઞ્ચિત્
કર્તું દ્રષ્ટું સ્મર્તુમશક્તઃ પુનરપિ શેષભાવમેવ યાચમાનો
ભગવન્તમેવ અવિચ્છિન્નસ્રોતોરૂપેણાવલોકયન્નાસીત ।

તતો ભગવતા સ્વયમેવાત્મસઞ્જીવનેનાવલોકનેનાવલોક્ય
સસ્મિતમાહૂય સમસ્તક્લેશાપહં નિરતિશયસુખાવહમાત્મીયં
શ્રીમત્પાદારવિન્દયુગલં શિરસિ કૃતં ધ્યાત્વાઽમૃતસાગરાન્તઃ
નિમગ્નસર્વાવયવઃ સુખમાસીત ॥

॥ ઇતિ શ્રીભગવદ્રામાનુજવિરચિતે શ્રીવૈકુણ્ઠગદ્યં સમ્પૂર્ણમ્ ॥

Encoded by Rajnarayanan C K krajnara at gmail.com
Proofread by Rajnarayanan C K, PSA Easwaran

*shrIvaikuNThagadyam*
pdf was typeset on December 25, 2022

Please send corrections to *sanskrit@cheerful.com*